संस्कृत-वार्ता:

25/01/2026

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· राष्ट्रपतिः द्रौपदीमुर्मुः सप्तसप्तति-तमस्य गणतन्त्र-दिवसस्य पूर्वसन्ध्यायाम् अद्य राष्ट्र सम्बोधयिष्यति।

· सर्वकारेण विविधक्षेत्रेषु तेषाम् अज्ञातनायकानाम् योगदानं स्वीकृत्य चतुःपञ्चाशत् पद्मश्रीपुरस्कारेभ्यः नामानि घोषितानि।

· प्रधानमन्त्रिणा नरेन्द्रमोदिना उद्यमाः, स्टार्ट्-अप्-संस्थाः च गुणवत्तायाः विषये अवधानं दातुं आहूतम् । आकाशवाण्याः मन की बात इत्येतस्मिन् कार्यक्रमे स्वीय विचारान् प्रकटयन्, श्रीमोदी अवदत् यत् भारतस्य अर्थव्यवस्था द्रुतगत्या अग्रे गच्छति, विश्वं च भारतं प्रति पश्यति।

· क्रिकेट्-क्रीडायां, अद्य सायङ्काले गुवाहाटी-नगरे भारत-न्यूजीलैण्ड्-देशयोः मध्ये तृतीया विंशतिं प्रति विंशति स्पर्धा क्रीड्यते।

<u>राष्ट्रपतिः/सम्बोधनम्</u>

राष्ट्रपतिः द्रौपदीमुर्मुः सप्तसप्तति-तमस्य गणतन्त्र दिवसस्य पूर्वसन्ध्यायाम् अद्य राष्ट्रं सम्बोधयिष्यति। सम्बोधनमिदम् आकाशवाणी-दूरदर्शनयोः सर्वासु वाहिनीषु हिन्दी-आङ्गल-भाषयोः सायं सप्तवादनात् प्रसारयिष्यते। दूरदर्शनस्य सर्वाभिः वाहिनीभिः हिन्दी-आङ्गल-भाषयोः सम्बोधनस्य प्रसारणानन्तरम् अस्य कार्यक्रमस्य प्रसारणं भविष्यति। आकाशवाणी रात्रौ सार्ध-नववादनात् अस्य क्षेत्रीय-भाषा-संस्करणस्य प्रसारणं करिष्यति ।

<u>राष्ट्रियमतदातृदिवस</u>

राष्ट्रपतिः द्रौपदीमुर्मु: अद्य उक्तवती यत् मतदानं केवलं राजनैतिक अभिव्यक्ति नास्ति अपितु देशस्य लोकतान्त्रिक निर्वाचनप्रक्रियायां नागरिकाणां विश्वासस्य प्रतिबिम्बम् अस्ति। अद्य नवदिल्ल्यां राष्ट्रियमतदातृदिवसकार्यक्रमं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत् मतदानं तादृशी माध्यम: अस्ति येन माध्यमेन नागरिकाः स्वस्य इच्छां प्रकटयन्ति।

राष्ट्रपतिः निज सम्बोधने अन्तर्राष्ट्रीय लोकतंत्रं समेत्य अन्तर्राष्ट्रीय आईडिया एतस्मिन् भारतस्य आध्यक्षं प्रकाशितवती ।

राष्ट्रपतिः द्रौपदी मुर्मुः प्रौद्योगिकी, निर्वाचन-प्रबन्धनं , रसद-व्यवस्थापनं च, अभिनव-मतदातृ - जागरूकता तथा आदर्श-आचार-संहितायाः कार्यान्वयनं प्रवर्तनं चेत्यादिषु अन्येषु क्षेत्रेषु अपि पुरस्काराः प्रदत्तवती। आकाशवाण्याः समाचार सेवा प्रभागेण पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षाय मतदातृ-शिक्षा- जागरूकता-अभियानाय इलेक्ट्रॉनिक रेडियो श्रेण्यां मीडिया पुरस्कारं विजितम्। राष्ट्रपतिः आकाशवाण्याः निदेशकं राजीव कुमार जैनं पुरस्कारं प्रदत्तवती। अस्मिन् अवसरे विधि-न्याय-मन्त्री अर्जुन-राम-मेघवालः, मुख्यनिर्वाचनायुक्तः ज्ञानेशकुमारः, निर्वाचनायुक्तः डॉ. सुखबीरसिंह सन्धुः डॉ. विवेक जोशी च अपि उपस्थिताः आसन्।

<u>पद्म-पुरस्काराः</u>

असाधारणं योगदानं कुर्वतां सामान्य-भारतीयानां उत्सवस्य सिद्धान्तम् अनुवर्तयन्, प्रशासनेन अस्य वर्षस्य अज्ञात-नायकानां पद्म-पुरस्काराः घोषिताः। अद्यावधि प्राप्तसूचनानुसारं प्रशासनं पद्मश्रीपुरस्काराय चतुःपञ्चाशत् जनानां चयनम् अकरोत्।

पुरस्कार विजेतृसु कर्नाटकस्य आंके गौड़ा (शिक्षा साहित्ययो:), महाराष्ट्रस्य अर्मिडा फर्नांडिस: (चिकित्सायाम्), मध्य प्रदेशस्य भगवानदास रायकवार: (क्रीडायाम्), महाराष्ट्रस्य भीकल्या लाडक्या ढिंडा (कलायां), जम्मूकश्मीरस्य बृज लाल भट: (सामाजिक कार्ये), छत्तीसगढ़स्य बुधरी थाती (सामाजिक कार्ये), ओडिशायाः चरण हेमब्रम ( शिक्षासाहित्ययो:), उत्तर प्रदेशस्य चिरंजी लाल यादव: (कलायां), तेलंगानायाः डॉ. कुमारसामी थंगराज: (शोधकार्ये) अपि च गुजरातस्य धार्मिकलाल चुन्नीलाल पंड्या (कलायां), जम्मू कश्मीरस्य डॉ. पद्मा गुरमेंट: (चिकित्सायाम्), तमिलनाडोः डॉ. पुन्नियम-मूर्ति नटेसन: (पशु चिकित्सा वैज्ञानिक:), उत्तर प्रदेशस्य डॉ. श्याम सुंदर: (चिकित्सायाम्), राजस्थानस्य गफरूद्दीन मेवाती (कलायां), मेघालयस्य हैली वार (सामाजिक कार्यकर्त्री), छत्तीसगढ़स्य इंद्रजीत सिंह सिंधु (सामाजिक कार्ये), पुडुचेरी प्रदेशस्य के. पजानिवेल (कलायां), मध्य प्रदेशस्य कैलाश चंद्र पंत: (शिक्षासाहित्ययो:), हरियाणायाः खेमराज सुंदरियालः (कलायाम्), पर्यावरण-वनी-करणाभ्यां केरलस्य कोल्लक्कयिल देवकी अम्मा जी, शिक्षासाहित्ययोः ओडिशायाः महेंद्र कुमार मिश्रा, कलायां गुजरातस्य मीर हाजीभाई कसम्भही,

पर्यावरणे मध्य प्रदेशस्य मोहन नागरः, शिक्षासाहित्ययोः त्रिपुरायाः नरेश चंद्र देव वर्मा, सामाजिक कार्ये गुजरातस्य नरेश मालदेल्वाला, कलायाम् असम-राज्यस्य नूरुद्दीन अहमदः, कलायां तमिलनाडोः ओथुवर थिरुथानी, कलायाम् असमराज्यस्य पोकिला लेकथेपी, तमिलनाडोः आर कृष्णन, चिकित्सायां छत्तीसगढ़स्य रामचंद्र: सुनीता गोडबोले च, कृषिक्षेत्रे उत्तरप्रदेशस्य रघुपत सिंहः, कलायां महाराष्ट्रस्य रघुवीर केहड़करः, कलायां तमिलनाडोः राजस्थानी कलियप्पा गौंडरः, दुग्ध-पशुपालनयो: तेलंगानायाः रामा रेड्डी ममिडी, सामाजिककार्ये कर्नाटकस्य एस.जी. सुशीलम्मा, कलायां नागालैंड राज्यस्य संग्युसांग एस पोंगेनरः,शिक्षासाहित्ययोः जम्मू कश्मीरस्य शफी शौकः, कृषिक्षेत्रे महाराष्ट्रस्य श्रीरंग देवबा लाडः, कलायां ओडिशायाः सिमांचल पात्रो, कर्नाटकस्य सुरेश हनाग-वदाई औषधे, राजस्थानस्य तगा राम भील: कलायां, तेची गुबिन: आंध्र प्रदेशस्य सामाजिककार्ये, त्रिवरूर बख्त-वा-सलम तमिलनाडोः कलायां, विश्व बंधु कलायां, जमनाम जात्रा सिंह: मणिपुरस्य कलायां च सम्मिलितः अस्ति। अवधेयं यत् पद्म पुरस्कार-विजेतृणां नामानि प्रत्येकस्मिन् वर्षे गणतन्त्रदिवसस्य पूर्व सन्ध्यायां उद्घोषिताः भवन्ति।

## प्रधानमंत्री- मन की बात

प्रधानमन्त्री नरेन्द्रमोदी देशवासिनः, विशेषतः उद्योगस्य, स्टार्टअप-सम्बद्धानां च, गुणवत्तायाः उपरि बलं दातुं आग्रहं कृतवान् । अद्य आकाशवाण्याः मन की बात इति कार्यक्रमे स्वदृष्टिकोणं प्रकटीकुर्वन् श्री मोदी अवदत् यत् भारतस्य अर्थव्यवस्था द्रुतगत्या प्रगतिम् करोति तथा च समग्रं विश्वं भारतं प्रति पश्यति। सः देशे निर्मितानां सर्वेषां वस्तूनां गुणवत्तायाः परिष्कारार्थं जनान् आहूतवान् । सः अवदत् यत् उत्कृष्टता मानकं भवेत्। सः एतदपि अवदत् यत् एतेनैव देशः 'विकसितभारतम्' प्रति स्वस्य यात्रां अग्रे नेतुं समर्थः भविष्यति।

प्रधानमन्त्रिणा उक्तं यत् दशवर्षपूर्वं षोडशाधिकद्विसहस्रतम वर्षस्य जनवरीमासे देशः स्टार्टअप-इंडिया इत्यस्य यात्रां प्रारभत् । श्री मोदी उक्तवान् यत् अद्य भारतं विश्वस्य तृतीयं बृहत्तमं स्टार्ट-अप इकोसिस्टम् इत्यभवत्।

राष्ट्रियमतदातृ दिवसावसरे श्री मोदी अवदत् यत् मतदातारः लोकतन्त्रस्य आत्मा: सन्ति। सः अवदत् यत् यदा कदापि कश्चन युवा प्रथमवारं मतदाता भवति तदा समग्र: ग्रामः, नगरं वा एकत्रीभूय तस्य अभिनन्दनं कुर्युः मिष्टान्नं च वितरेयुः। प्रधानमन्त्री उक्तवान् यत् श्वः राष्ट्रं गणतन्त्रदिवसं आमानायिष्यति। अस्मिन्नेव दिने संविधानम् अङ्गीकृतमासीत्।

## क्रिकेट

भारत-न्यूजीलैंड-देशयोः मध्ये अनुवर्तमानायां विंशतिं प्रतिविंशति-क्षेपचक्रीय-क्रिकेट्-स्पर्धा-मालिकायां गुवाहाट्याः बारसापारायाम् अद्य तृतीया स्पर्धा आयोजयिष्यते । स्पर्धेयं भारतीय-समयानुसारं सायं सप्तवादने आरप्स्यते ।

।। इतिवार्ता: ।।